# वृद्धिरादैच्सूत्रविमर्शः

**उपेन्द्रदाहालः**

Department of Vyakaran (Sanskrit Grammar)
Balmeeki Vidyapeeth,
Kathmandu, Nepal

*Submitted: 28 Nov. 2025*
*Reviewed : 18 Dec. 2025*
*Accepted : 28 Dec. 2025*
***DOI:** 10.3126/kdk.v6i1.90118*

***Corresponding Author:***
*Upendra Dahal*
***Email:**uppendeadahal44@gmail.com*
**ORCID**:*https://orcid.org/0009-0001-4077-0726*

*Copyright 2026 © the Author (s) and the Publisher*

**कौमोदकी**
***Kaumodaki***
**Journal of Multidisciplinary Studies**
A Peer-Reviewed, Open Access Journal

**ISSN :**
2822 - 1567 (Print)
2822 - 1583 (Online)
https://www.nepjol.info/index.php/kdk/about

**Published by :**
Research Management Cell
Shree Binduwasini Sanskrit Bidhyapeeth (Campus)
Nepal Sanskrit University, Pokhara, Nepal
https://ejournal.vsc.edu.np

**सारः** आलेखेऽस्मिन् अष्टाध्याय्याः प्रथमसूत्रस्य 'वृद्धिरादैच्' इत्यस्य समग्रतोऽध्ययनं विश्लेषणं समालोचनञ्च कृत्वाष्टाध्याय्याः प्रणयनकाले स्थितां पाणिनेर्भाषावैज्ञानिकीं हृदयस्थितिं विज्ञातुं प्रयतितमस्ति । प्रयासोऽयमष्टाध्याप्याः संरचनाया विज्ञानाय विहितः प्रथमसोपानरूपो वर्तते । तत्र महर्षिणा पाणिनिनात्याश्चर्यमयोऽष्टाध्यायीग्रन्थो विरचितोऽस्तीति च प्रथित एव विषयः । अष्टाध्याय्यां परिकल्पिताः पारिभाषिकसंज्ञाः, नियमव्यवस्था, अनुवृत्तिव्यवस्था, अपवादव्यवस्था, षड्विधसूत्राणां व्यवस्था, गणसूत्राणां परिकल्पना, प्रत्याहारव्यवस्था, अन्यानि भाषावैज्ञानिकतत्त्वानि च अपूर्वाणि, गभीराणि, अत्युन्नतबुद्ध्या प्रकल्पितानि च वर्तन्ते । तत्र वृद्धिरादैच्सूत्रस्य महाभाष्यादिटीकाग्रन्थेषु विहितानि व्याख्यानान्याधृत्य कृतेन समग्रविश्लेषणेन व्याख्यानेन चाष्टाध्याय्याः प्रणयनस्यारम्भे पाणिनेः शाब्दिकी मनोदशा किदृश्यासीदिति ज्ञातुमनुमातुञ्च शक्येत वा ? इति विचार्य तदर्थमत्र प्रयत्नः कृतो विद्यते । तत्र पाणिनीयव्याकरणशास्त्रे वर्णानां, शब्दानाञ्चावबोधनायासन्नशतसंख्यायां पारिभाषिकसंज्ञाः परिकल्पिताः सन्ति । 'वृद्धिः' तासु सर्वप्रथमा संज्ञा ।अत्रालेखेस्मिऽन् लोके वृद्धिपदार्थः, पाणिनीयव्याकरणे पारिभाषिकसंज्ञात्वेन कल्पिता वृद्धिसंज्ञा, सूत्रस्थपदानां विवृतिः, संज्ञासूत्रत्वनिर्णयः, तद्भावितातद्भवितयोः चर्चा, विपरीतार्थस्य निरसनम्, आदैजितिपदे तपरकरणस्य प्रयोजनम्, वृद्धिपदस्य संज्ञापदत्वनिर्णयः, चकारस्य कुत्वाभावनिर्णयः, सूत्र आदैजिति प्रत्याहारस्यान्तर्भूतत्वात् प्रथमं प्रत्याहारप्रपञ्चस्य प्रतिपादनं समुचितमिति विचारः, वृद्धिसंज्ञायाः प्रत्येकं परिसमाप्तिरिति प्रतिपादनम्, वृद्धिसंज्ञायाः प्रयोगस्थलानि, अनुवृत्तिस्थलानि, वृद्धिशब्दस्य प्रयोजनम्, वृद्धिसन्धेर्विचारः, विभिन्नटीकाकाराणां मते सूत्रार्थविचारः, वृद्धिरादैच्सूत्रस्याष्टाध्याय्यां प्रभावश्चेत्यादयो विषया विवेचिता वर्तन्ते ।

**शब्दकुञ्जी :** अन्योन्याश्रयः, आदैच्, गुणाभेदकपक्षः, तद्भावितः**,** तपरः ।

**विषयपरिचयः**

**'अहरहः सन्ध्यामुपासीत'** इत्यादिवेदवचनेन सन्ध्यावन्दनादिकर्मणां नित्यकर्मत्वेन प्रतिपादनवद् **'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्चेति । प्रधानं च षट्ष्वङ्गेषु व्याकरणम्'**(पतञ्जलिः, २०२५, पृ.१६) इति वचनाद् व्याकरणस्य वेदाङ्गेषु प्रधानभूतत्वाद् ब्राह्मणानां निष्कारणं व्याकरणादिशास्त्राणामध्ययनादिकर्मसु प्रवर्तनमावश्यकम् । **'रक्षोहागमलघ्वसन्देहाः प्रयोजनम्'**(पतञ्जलिः, २०२५, पृ.४) इति व्याकरणशास्त्रस्याध्ययनस्य प्रयोजनं दर्शयति महाभाष्ये पतञ्जलिः । व्याकरणाध्ययनेन साधुशब्दानां ज्ञानम्, तज्ज्ञाने च धर्मो भवतीत्यतो व्याकरणशास्त्रमवश्यमध्येयमिति सिद्ध्यति ।

अत एव च सृष्टेरारम्भाद् व्याकरणाध्ययनस्य परम्पराविच्छिन्नरूपेण प्रचलिता वर्तते । तत्र क्रमे सर्वप्रथमं व्याकरणं **'ब्रह्मा बृहस्पतये प्रोवाच, ततः क्रमेण बृहस्पतिरिन्द्राय, इन्द्रो भारद्वाजाय, भारद्वाजो ऋषिभ्यः, ऋषयो ब्राह्मणेभ्यः'**(ऋक्–तन्त्रे, १।४)। एवं परम्परागतव्याकरणेषु बहवः प्राचीनाचार्याः बभूवुः, यथा–ऐन्द्रः, चान्द्रः, काशकृत्स्नः, आपिशली, शाकटायनः, शाकल्यः, गार्ग्यः, स्फोटायनश्चेत्यादयः । **पाणिनिः केदारक्षेत्रे महेश्वरध्यानपरो द्वादशभिर्वर्षैः प्रसादितान्महेश्वराड्डमरुध्वनिना चतुर्दश वर्णसमान्नायसूत्राणि समवाप** (हरिप्रसादः, अष्टाध्यायी(ण)पृष्ठे) । स च समेषां प्राक्वर्तिनां वैयाकरणाचार्याणां व्याकरणचिन्तनं भाषावैज्ञानिकं चिन्तनं वा संगृह्य, नूतनबुद्धिप्रभायाः योगेन नूतनसूत्रपद्धतिमतीव परिष्कृतां कृतवान् । पाणिनेरुत्तरकालिका भाषावैज्ञानिकाः पाणिनीयं नियमरत्नं गृहीत्वा भाषानियमस्य नूतनपद्धतिं प्रारभन्त । सम्प्रति पाणिनीयं व्याकरणं युगानुयुगं वाग्विदां मार्गदर्शकत्वेन प्रतिष्ठितं विद्यते । भारतीयवाङ्मयपरम्परायां पाणिनीयं व्याकरणशास्त्रं भाषाशास्त्रस्य मेरुदण्डस्य रूपेण विद्यमानमस्ति । पाणिनीयव्याकरणे परिकल्पिता नियमव्यवस्था, सूत्रेष्वनुवृत्तिव्यवस्था, परस्परमपवादव्यवस्था, षड्विधानां सूत्राणां प्रणयनम्, भाष्यकारस्य परिभाषारूपाणि वचनानि, कात्यायनस्य वार्तिकानि, गणसूत्राणां परिकल्पना, प्रत्याहारस्य परिकल्पना, अन्यानि भाषावैज्ञानिकतत्त्वानि च मानवानां बौद्धिकशक्तेः चरमसीमायाः रूपेण विद्यमानानि सन्तीति निश्चप्रचं वक्तुं शक्यन्ते ।

एवं स्थितौ सूत्राणां प्रणयनसमय आरम्भे पाणिनेर्भाषिकचिन्तनस्य स्थितिः किदृश्यासीद् ? इत्यष्टाध्याय्याः प्रथमसूत्रस्य विवेचनेनानुमातुं शक्यते वा ? इति विचार्यालेखेस्मिन् तदनुमातुं प्रयतितमस्ति ।

**समस्याकथनम्**

**'वृद्धिरादैच्'**(पा. सू. १।१।१) इति सूत्रस्य विमर्शनस्य क्रमे सन्ति नैकाः समस्याः । तासु काश्चन मुख्यत्वेन दृश्यन्ते ।

(क) सूत्रप्रणयनस्यारम्भकाले पाणिनेः चिन्तनस्य स्थितिः किदृशी स्यात्**?**

**(**ख) 'वृद्धिरादैच्' इति सूत्रस्थविवेच्यविषयाः के **?**

(ग) 'वृद्धिरादैच्' इति सूत्रस्याष्टाध्याय्यां प्रभावः कीदृशः?

**अध्ययनस्योद्देश्यम्**

**'वृद्धिरादैच्'**(पा. सू. १।१।१) इति पाणिनीयसूत्रस्य विमर्शने केन्द्रीभूय समस्याकथन उपस्थापितानां समस्यानां समाधानस्यान्वेषणमस्यालेखस्य मुख्यमुद्देश्यं भवति। फलतोऽस्य लेखस्योद्देश्यमधोनिर्दिष्टानुसारं निश्चितमस्ति।

(क) सूत्रप्रणयनस्यारम्भकाले पाणिनेः चिन्तनस्य स्थितेरनुमानम्।

(ख) वृद्धिरादैच्सूत्रस्य व्याख्यानानां प्रकाशनपुरस्सरं सोहापोहं विवेच्यविषयाणां प्रकाशनम्।

(ग) 'वृद्धिरादैच्' इति सूत्रस्याष्टाध्याय्यां प्रभावस्य प्रदर्शनम्।

**पूर्वकार्यस्य समीक्षणम्**

तत्र **'वृद्धिरेचि'** इति पाणिनीयसूत्रमधिकृत्य बहुभिर्विद्वद्भिः बहुधा चिन्तनं व्याख्यानञ्च कृतं वर्तते। परन्तु 'वृद्धिरादैच्' सूत्रस्य विश्लेषणेन एव पाणिनेः तात्कालिकदशाया अनुमानाय, पाणिनेर्व्याकरणस्य संरचनाविज्ञानस्य प्रस्फोरणाय च केनापि जनेन प्रवर्तितं न दृश्यते। एतदर्थमेवानुसन्धानाय मे प्रवृत्तिः सम्भूतास्ति। अत्र क्रमे पूर्ववर्तिभिराचार्यैर्वृद्धिरादैजिति पाणिनीयं सूत्रमधिकृत्य विहितं चिन्तनमतिसंक्षेपेणात्र प्रस्तूयते।

क. अस्य सूत्रस्य व्याख्यानस्योपक्रमे सर्वप्रथमस्थानमस्ति पातञ्जलमहाभाष्यस्य। यत्र सूत्रस्थाः सर्वे विषया विस्तरेण विवेचिता वर्तन्ते । पश्चात्तनाचार्यैश्च महाभाष्यस्य विषयाः प्रमाणत्वेन गृहीताः सन्ति । परमत्र ग्रन्थे सम्पूर्णाष्टाध्यायीग्रन्थदिशा, 'वृद्धिरादैच्' इति सूत्रस्याष्टाध्याय्यां किदृशः प्रभावोस्तीति विषयः समग्रेण विचारितो नास्तीत्यतोऽस्य लेखस्यारम्भः कृतो वर्तते।

ख. अष्टाध्याय्याः काशिकादिसूत्रक्रमानुसारिव्याख्याग्रन्थेषु विहङ्गमरूपेणास्मिन् सूत्रोपरि विचारः कृतोस्ति,परन्त्वालेखेस्मिन् अधुनावधिविहितानां टीकानां समीक्षणपुरस्सरं समेषां टीकाकाराणामाशयस्य प्रकाशनपूर्वकञ्च वृद्धिरादैच् सूत्रस्य प्रणयनकाले पाणिनेराचार्यस्य बुद्धेरवस्थाया अनुमानं कृत्वा तत्प्रकाशनाय प्रयतितं वर्तते।

ग. अष्टाध्याय्यां सूक्ष्मरूपेणानुसन्धानं कृत्वामागमनपद्धतिमनुसृत्य छात्राणां सौकर्याय भट्टोजिदीक्षितेन **'वैयाकरणसिद्धान्तकौमुदी'** इति ग्रन्थः प्रणीतः। तदुत्तरकालादधुनावधि इयमेव च कौमुदी पठनपाठनादिकर्मसु समाविष्टास्ति। तत्र च बालच्छात्राणां कृतेऽत्यन्तायां सरलशैल्यां **बालमनोरमा तत्त्वबोधिनी** चेति टीकाद्वयं विरचितमिति सम्प्रति लोके प्राप्यते। तत्र टीकाद्वयस्य बालानामुपकारो भवत्विति प्रयोजनं निर्धाय लेखनात्तत्र सूत्रस्थाः सर्वे विषयाः साधु विवेचिता न सन्तीत्यत आलेखस्यास्य आरम्भः कृतोऽस्ति।

घ. भट्टोजिदीक्षितेनाथ च नागेशेन लिखिताः 'प्रौढमनोरमा' लघुशब्देन्दुशेखरश्चेत्यादयः प्रौढटीकाग्रन्थाः प्रक्रियानुसारिणः सारभूताः सन्ति। यत्र सूत्रस्था विषयाः प्रौढरूपेण साधु विवेचिताश्च विद्यन्ते। परन्त्वष्टाध्याय्याः संरचनाविज्ञानस्य सङ्केतस्य रूपेण **'वृद्धिरादैच्'** इति सूत्रस्य व्याख्यानं कृतं नास्तीत्यत आलेखेऽस्मिन् तदर्थं प्रयतितमस्ति।

ङ. सभापतिशर्मोपाध्यायप्रभृतिभिर्महावैयाकरणैः स्वस्य लक्ष्मीटीकादिपरिष्कारग्रन्थेषु सविस्तरं **'वृद्धिरादैच्'** सूत्रोपरि गभीरेण विचारः कृतो दृश्यते । तद्रूपेण चिन्तनञ्चाधुनातनविदुषां कृतेऽसम्भवप्रायञ्चास्तीति दृग्गोचरी भवति, तथापि आलेखेऽस्मिन् उपर्युक्तान् सर्वान् टीकाग्रन्थान् समालोच्य सम्पूर्णाष्टाध्याय्यां परिकल्पितानि भाषावैज्ञानिकतत्त्वान्याधृत्य प्रतिनिधिसूत्रस्य रूपेण वृद्धिरादैजिति सूत्रं दर्शयितुं प्रयतितं वर्तते ।

**सीमाङ्कनम्**

अनुसन्धानमेतत् पाणिनीयव्याकरणस्य संरचनाया विज्ञानाय विहितमेकं सोपानमस्तीत्यतोऽस्य लेखस्य सीमाङ्कनत्वेन पाणिनिना स्वीयव्याकरणे परिकल्पितेषु पारिभाषिकसंज्ञाविधायकेषु सूत्रेषु **'वृद्धिरादैच्** (पा. सू. १।१।१)इति सूत्रस्य स्थाननिर्धारणम्, तत्तद्व्याख्याग्रन्थोक्तसूत्रसम्बद्धविषयाणां समीक्षणम्, महाभाष्योक्तसूत्रस्थविषयान् सर्वोपरि संस्थाप्य **'वृद्धिरादैच्'** इति सूत्रस्य विवेचनञ्चास्यालेखस्य सीमाङ्कनत्वेन निर्धारितानि वर्तन्ते ।

**अध्ययनविधिः**

अस्यालेखस्य कृते आवश्यकसामग्रीणां सङ्कलनाय पुस्तकालयीयाध्ययनविधिरेव प्राधान्येन स्वीकृतोऽस्ति । तत्र चास्मिन् लेखेऽष्टाध्याय्याः प्रधानव्याख्याग्रन्थाः प्राथमिकसामग्रीत्वेन गृहीता वर्तन्ते । तत्तद्व्याख्याग्रन्थाः, परिष्कारग्रन्थाः, अनुसन्धानपराश्च ग्रन्था द्वितीयकसामग्रीत्वेन गृहीताः सन्ति । एवमेवास्मिन् लेखे यथावश्यकमागमनात्मकविधेर्निगमनात्मकविधेश्च प्रयोगं विधाय व्याख्यात्मको विश्लेषणात्मकश्च विधी प्राधान्येन प्रयुक्तौ स्तः ।

**सैद्धान्तिकी अवधारणा**

तत्र खलु महर्षिणा पाणिनिना तात्कालिकवैयाकरणानां प्राचीनवैयाकरणानाञ्च व्याकरणचिन्तनस्य सारं समाविश्य **'अष्टाध्यायी'** इति ग्रन्थो विरचितोऽस्ति । पाणिनीयव्याकरणे परिकल्पिताः नियमव्यवस्था, अनुवृत्तिव्यवस्था, अपवादव्यवस्था, षड्विधानां सूत्राणां व्यवस्था, भाष्यकारस्य परिभाषारूपाणि वचनानि, प्रत्याहारादिव्यवस्था च भाषाव्याकरणस्य सिद्धान्तरूपेण स्थिताः सन्तीत्यत इमान्येव तत्त्वान्यालेखेऽस्मिन् सैद्धान्तिकावधारणायाः रूपेणावलम्बितानि वर्तन्ते । तत्र विशेषतो व्याकरणमहाभाष्येऽस्मिन् सूत्रे दर्शिता विषया आलेखेस्मिन् सिद्धान्तत्वेन प्रदत्ता वर्तन्ते ।

***पाणिनेरष्टाध्यायी***

**'अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम् । तत्त्वावबोधः शब्दानां नास्ति व्याकरणादृते ।।'** (भर्तृहरिः, ई.सं.२००६,पृ. १३)इत्यनुसारेण व्याकरणं विना तत्त्वावबोधस्यासम्भवः । तत्र व्यक्तशब्दा एवार्थप्रत्यायका नाव्यक्तशब्दाः । व्यक्तशब्दाश्च द्वेधा साधवोऽसाधवश्च । तत्र साधुशब्दानां प्रयोगे धर्मः । उक्तञ्च पतञ्जलिना **'यस्तु प्रयुङ्क्ते कुशलो विशेषे, शब्दान् यथावद् व्यवहारकाले । सोनन्तमाप्नोति जयं परत्र वाग्योगविद् दुष्यति चापशब्दैः ।।'** (पतञ्जलिः,वि.सं.२०२५,पृ.८)। लोकव्यवहारेऽस्माभिर्ये शब्दाः प्रयुज्यन्ते तेऽपरिमिताः सन्ति । एतस्मिंश्चातिमहति

प्रयोगविषयके शब्दवाङ्मये के शब्दाः साधवः **?** के चासाधवः **?,** कथञ्च तेषु साधुत्वासाधुत्वपरिज्ञानम् **?** इति सर्वं व्याकरणशास्त्रज्ञानमन्तरेण निर्णेतुं न शक्यते । वाक्यपदीये श्रीमता भर्तृहरिणा चोक्तम् – **'साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः ।'** (भर्तृहरिः, ई.सं.२००६,पृ.१५०) इति। शब्दानां साधुता च शिष्टप्रयोगे निहिता। देशकालादिभेदेन शिष्टा अपरिमिताः, अपरिमिताश्च शिष्टप्रयुक्तशब्दा इत्युभावप्यपरिमिताविति स्पष्टम्। मानवप्रज्ञा च परिमितेति सर्वैरनुभूयते। अतो हेतोः परिमितया मानवप्रज्ञयाऽपरिमितशिष्टप्रयोगविषयकसाधुत्वपरिज्ञानं प्रतिशब्दं कथमपि कर्तुं न शक्यते। महाभाष्ये भगवता पतञ्जलिनाऽप्युक्तम् –

> **अनभ्युपाय एष शब्दानां प्रतिपत्तौ प्रतिपदपाठः। एवं हि श्रूयते बृहस्पति-रिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच नान्तं जगाम। बृहस्पतिश्च प्रवक्ता, इन्द्रश्चाध्येता, दिव्यं वर्षसहस्रमध्ययनकालो न चान्तं जगाम। किं पुनरद्यत्वे ? यः सर्वथा चिरं जीवति वर्षशतं जीवति। चतुर्भिश्च प्रकारैर्विद्योपयुक्ता भवति। आगमकालेन, स्वाध्यायकालेन, प्रवचनकालेन, व्यवहारकालेनेति । तत्र चास्यागमकालेनैवायुः कृत्स्नं पर्युपयुक्तं स्यात्। तस्मादनभ्युपाय एष शब्दानां प्रतिपत्तौ प्रतिपदपाठः** (पतञ्जलिः,वि.सं.२०२५,पृ.२०)इति।

पुनश्चाग्रे "**कथं तर्हीमे शब्दाः प्रतिपत्तव्याः ? किञ्चित्सामान्यविशेषवल्लक्षणं प्रवर्त्यम्। येनाल्पेन यत्नेन महतो महतः शब्दौघान् प्रतिपद्येरन्। किं पुनस्तत् ? उत्सर्गापवादौ। कश्चिदुत्सर्गः कर्तव्यः कश्चिदपवादः। कथंजातीयकः पुनरुत्सर्गः कर्तव्यः ? कथं जातीयकोऽपवादः ? सामान्येनोत्सर्गः कर्तव्यः। तद्यथा 'कर्मण्यण्' । तस्य विशेषेणापवादः। तद्यथा - "आतोऽनुपसर्गे कः"इति** (पतञ्जलिः,वि.सं.२०२५,पृ.२०)।

एतेन किमायातमिति प्रश्ने पाणिनीयप्रबोधे आह गिरिजेशः – **एतेनेदमायातं यदुत्सर्गापवादरूपाभ्यां सामान्यविशेषनियमाभ्यां शिष्टप्रयुक्तशब्दानां सरलतया पूर्वं ज्ञानमनन्तरं तेषां प्रयोगो जायते। तर्हि शिष्टाः शब्देषु प्रमाणं किमष्टाध्याय्या क्रियते ? इत्याशङ्क्य 'शिष्टपरिज्ञानार्थाऽष्टाध्यायी' इति पतञ्जलिना प्रतिपादितम् ।** (गिरिजेशः, ई. १९१८, पृ. ३) एतावता व्याकरणशास्त्रस्य निबन्धनस्यावश्यकतायां सिद्धौ पाणिनिः तात्कालिकानां वैयाकरणानाम्, प्राचीनानां वैयाकरणानाञ्च भाषावैज्ञानिकतत्त्वानि मतञ्च समाविश्यात्याश्चयमयीमष्टाध्यायीं रचितवान्। तत्र च **'प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचावकाशे प्राङ्मुखः उपविश्य महता यत्नेन सूत्रं प्रणयति स्म । तत्र वर्णेनाप्यनर्थकेन न भवितव्यम्, किं पुनरियता सूत्रेण ।'** (पतञ्जलिः, ई. २०२५, पृ. १२७)इति महाभाष्यानुसारेण पाणिनिराचार्य आसन्नसहस्रचतुष्टयम् **'वृद्धिरादैच्'** (पा. सू. १।१।१) इत्यत आरभ्य **'अ अ'** (पा. सू. ८।४।३८) इति पार्यन्तिकानि प्रमाणभूतानि सूत्राणि प्रणिनाय । शिवराजकौडिन्यायनः पाणिनीयशिक्षाख्यग्रन्थस्य भूमिकायामभियुक्तोक्तिमुद्धृत्य लिखति–**पाणिनीयं महाशास्त्रं पदसाधुत्वलक्षणम्। सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं न किञ्चन ।।** पाणिनेः तदीयाष्टाध्यायीग्रन्थस्य च विषये 'पाणिनिकालीन भारतवर्ष' इत्यस्मिन् ग्रन्थे वासुदेवशरणअग्रवाल कथयति–

> **आचार्य पाणिनि ने महान् अष्टाध्यायी शास्त्र की रचना की, जो अपनी विशालता, क्रमबद्धता एवं विराट् कल्पना के कारण भारतीय मस्तिष्क की उसी प्रकार की सविशेष कृति है जिस प्रकार पर्वत में उत्कीर्ण वेरूल**

**क्षेत्रका विशाल कैलास मन्दिर। पाणिनि ने संस्कृतभाषा को अमरता प्रदान की।** (वासुदेवशरण अग्रवाल, ई. १९९६, पृ. १)

पाणिनिना स्वीयाष्टाध्याय्यां संज्ञापरिभाषाविधिनियमातिदेशाधिकारभेदेन षोढा सूत्राणि रचितानि वर्तन्ते। तत्रासन्नशतं पारिभाषिकसंज्ञा अष्टाध्याय्यां प्रकल्पिता वर्तन्ते। तासु वृद्धिः प्रथमा।

*व्याख्यानानि*

**'वृद्धिरादैच्'** (पा. सू. १।१।१) इति सूत्रस्य व्याख्यानावसरे प्रायशो व्याख्याकारैः स्वीयग्रन्थस्य प्रणयनस्योद्देश्यानुसारं सूत्रस्थविषया विवेचिता व्याख्याताश्च वर्तन्ते । तत्र प्रायश आचार्यैः संज्ञासूत्रत्वविचारः, तद्भावितानामतद्भावितानाञ्चेतिभयविधानाम् 'आ, ऐ,औ' वर्णानां वृद्धिसंज्ञा, सूत्रस्योदाहरणानि, आदैच्पदे तपरकरणस्य प्रयोजनञ्चेत्यादिविषयाणां विशेषतो व्याख्यानं कृतं दृश्यते।

तथा हि काशिकाकारः–**'वृद्धिशब्दः संज्ञात्वेन विधीयते प्रत्येकमादैचां वर्णानां सामान्येन तद्भावितानामतद्भावितानां च । तपरकरणमैजर्थं तादपि परस्तपर इति, खट्वैडकादिषु त्रिमात्रचतुर्मात्रप्रसङ्गनिवृत्तये । आश्वलायनः । ऐतिकायनः । औपगवः । औपमन्यवः । शालीयः । मालीयः । वृद्धिप्रदेशाः –'सिचि वृद्धिः परस्मैपदेषु' इत्येवमादयः ।** (काशिका, पा. सू. १।१।१) महावैयाकरणो भट्टोजिदीक्षितः सिद्धान्तकौमुद्यामाह–**'आदैच्च वृद्धिसंज्ञः स्यात् ।'** (दीक्षितः, २०२४, पा. सू. १।१।१) अयमेव चाचार्यः प्रौढमनोरमायामाह– **'ऐजिह द्विमात्र एव, तात्परत्वात्। तेन कृष्णैकत्वमित्यत्र त्रिमात्रो न।'** (दीक्षितः, २०२४, पृ. १०४) इति। सिद्धान्तकौमुद्या व्याख्यानावसरे बालमनोरमाटीकायां वासुदेवदीक्षित 'वृद्धिरादैच्' इति सूत्रे तपरकरणस्य कारणेन प्रत्यहारगर्भितत्वाद् 'अणुदित्सवर्णस्य चाप्रत्ययः' (पा. सू. १।१।६९)इति सूत्रस्यानन्तरं पाठस्यौचित्यं दर्शयति। **'यद्यपि पाणिनीयाष्टाध्याय्यामिदमादिमं सूत्रं, तथापि नेदमादावुपन्यस्तम्, अस्य सूत्रस्य तपरकरणेन प्रत्याहारगर्भितत्वेन ग्रहणकशास्त्रनियमार्थतपरसूत्रप्रत्याहारसूत्रप्रवृत्त्युत्तरप्रवृत्तिकतया प्रत्याहारशास्त्रप्रपञ्चनिरूपणात्प्रागुपन्यासनर्हत्वात्। न च सूत्रकृतायमेव पाठकमः कुतो नाद्रियत इति वाच्यम्। स्वतन्त्रेच्छस्य महर्षेर्नियन्तुमशक्यत्वात् ।** (वासुदेवदीक्षितः, ई. २००३, पृ. ३१) आदैच्पदे समासस्य चकारस्य कुत्वाभावस्य च सन्दर्भे आह–

> **आच्च ऐच्चेति समाहारद्वन्द्वः । द्वन्द्वाच्चुदषहान्तात् । इति समासान्तस्तु न, अत एव निर्देशेन समासान्तविधेरनित्यत्वात्। 'चोः कुः' इति पदान्ते विहितं कुत्वमपि न। 'अयस्मयादीनि छन्दसि' इति भत्वात्। 'वृद्धिरादैजदेङ' इति संहितापाठपक्षे चकारस्य 'झलां जशोऽन्ते' इति पदान्ते विहितजश्त्वं तु भवत्येव, 'उभयसंज्ञान्यपि छन्दसि दृश्यन्ते' इति वचनात् छन्दोवत्सूत्राणि भवन्ति इति छान्दसविधीनां सूत्रेष्वपि प्रवृत्तेः। नचैवमपि पदत्वात्कुत्वं भत्वाज्जश्त्वाऽभावश्च कुतो न स्यादिति वाच्यम्, 'छन्दसि दृष्टानुविधिः' इति वचनादित्यलम्। आच्च ऐच्चेतीतरेतरयोगद्वन्द्वो वा। तथा सति सौत्रमेकवचनम्।**

**आचार्यपारंपर्योपदेशसिद्धसंज्ञाधिकारात् संज्ञेति लभ्यते ।** (वासुदेवदीक्षितः, ई. २००३, पृ. ३२) । सूत्रस्थविवेच्यविषयाणां सन्दर्भे तत्त्वबोधिनीकार आह–

> **आच्च ऐच्चेति इतरेतरयोगद्वन्द्वः,'सुपां सुलुग्।।' औङः सुर्लुग्वा । यद्वा समाहारद्वन्द्वः । नचैवं द्वन्द्वाच्चुदषहान्तात्समाहारे इति टच्स्यादिति वाच्यम्, समासान्तविधेरनित्यत्वात् । अथवा 'आद्' इत्यसमस्तमेवास्तु, वृद्धिशब्दस्तन्त्रेणावृत्त्या वा योजनीयः । अयस्मयादित्वेन भत्वाच्चोः कुर्न । ऐजिह द्विमात्र एव, तात्परत्वात्, तेनकृष्णैकत्वमित्यत्र त्रिमात्रो न । वृद्धिप्रदेशाः- 'वृद्धिरेचि' इत्यादयः ।** (ज्ञानेन्द्रसरस्वती, ई. २००३, पृ.२९) शब्दरत्नादिप्रौढटीकाग्रन्थे सूत्रमिदमादाय न किमप्युक्तमस्ति।

लघुशब्देन्दुशेखरे महावैयाकरणनागेशः तपरग्रहणस्य विषये आह– **तपरकरणमसन्देहार्थतया पूर्वार्थम्, प्रकृतसूत्रे भाष्येऽत्र शास्त्रे गुणानामभेदकत्वं ज्ञापकादाश्रित्य सवर्णग्रहणार्थत्वाभावस्योक्तत्वात् । कृष्णौत्कण्ठ्यं, गङ्गौघ इत्यादौ त्रिमात्रव्यावृत्तये परार्थमपि वृद्धिशब्दोऽत्र पदपरोऽर्थपरत्वासम्भवात् ।**(नागेशः, ई. २०५८, पृ. ४२)

व्याख्यानाद् वृद्धिशब्दस्य संज्ञात्वं बोध्यम् । पूर्वपाठस्तु मङ्गलार्थः तदाह– **वृद्धिशब्दस्य सञ्ज्ञात्वन्तु व्याख्यानात् । विधेयत्वेऽपि तस्य पूर्वपाठो मङ्गलार्थः । 'अपृक्त एकाल्...'** (पा. सू. १।२।४१) **इत्यादौ तथा करणं विधेयस्य प्रथमं प्रयोगेऽसाधुत्वभ्रमनिवारणायेति भाष्ये स्पष्टम् ।**(नागेशः, ई. २०५८, पृ. ४२)

कार्यकालपक्षे विधिशास्त्राणां बोधानन्तरं वृद्ध्यादिपदार्थः क इति जिज्ञासायां संज्ञाशास्त्राणामुपस्थित्या विधिवाक्यार्थेन सह वाक्यैकवाक्यता तदाह–

> **कार्यकालपक्षे मृजेर्वृद्धि ७।२।११४ इत्यादौ वृद्धिपदार्थजिज्ञासायां वृद्धिरादैच् १।१।१ इत्युपस्थित्या तदर्थबोधरूपे शक्तिग्रहे वृत्ते विधिवाक्यार्थबोधः । अत एव ष्यङः सम्प्रसारणम् ६।१।१३ इति सूत्रे भाष्ये- कार्यकालं सञ्ज्ञापरिभाषम्, भस्येत्युपस्थितमिदं भवति- यचि भम् १।४।१८ इति इत्युक्तम् । ईदूदेद् १।१।११ इति सूत्रे भाष्येऽपि- कार्यकालं सञ्ज्ञापरिभाषम्, प्रगृह्यः प्रकृत्येत्युपस्थितमिदं भवति– ईदूदेद् द्विवचनं प्रगृह्यम् १।१।११ इति । निष्ठा ३।२।१०२ इति सूत्रे कैयटोऽपि- निष्ठेत्युक्ते सञ्ज्ञावाक्यं - क्तक्तवतू निष्ठा १।१।२६ इति स्मर्यते** । (नागेशः, ई. २०५८, पृ. ४२)

संज्ञासूत्राणां विषये यथोद्देशपक्षे त्वेकदा शक्तिज्ञानानन्तरं सर्वत्र तेनैव कार्यनिर्वाहः तदुक्तं नागेशेन – **यथोद्देशे तु एकदैव शक्तिग्रहात्सर्वत्र बोध इति विशेषः।** (नागेशः, ई. २०५८, पृ. ४२) काशिकाग्रन्थस्य व्याख्यानपरम्परायां 'वृद्धिरादैच्' सूत्रस्य संज्ञाशास्त्रत्वनिर्णयात् पूर्वं विहिताः केचित् प्रश्नाः, तत्समाधानञ्च।

(क) उदात्तादिवचनवत् सूत्रमिदमनर्थकं वा?

(ख) साध्वनुशासनार्थं वा ? वृद्धिशब्दस्यादैचाञ्चानेन साधुत्वमाख्यायते?

(ग) प्रयोगनियमार्थं वा ? आदैच पर एव वृद्धिशब्दः प्रयोक्तव्य इति ?

(घ) आदेशार्थं वा ? आदैचां वृद्धिशब्द आदेशो भवति ते वा तस्येति?

(ङ) आगमागमिसम्बन्धार्थं वा ? आदैचां वृद्धिशब्द आगमो भवति, ते वा तस्येति?

(च) विशेषणविशेष्यभावप्रसिद्ध्यर्थं वा, आदैचां वृद्धिशब्दो विशेषणम्, एकविभक्तिकत्वं ह्यत्र दृष्टम्, दृष्टश्चैकविभक्तिकयोर्विशेषणविशेष्यभावः, तद्यथा नीलमुत्पलमिति।

(छ) सञ्ज्ञासञ्ज्ञिसम्बन्धार्थं वा? दृश्यते हि सोऽप्येकविभक्तिकयोः, तद्यथा `अयं पनसः` इति ?

***तत्र उपर्युक्तविषयाणां क्रमेण समाधानम् –***

(क).समधिगतज्ञानातिशयो ह्याचार्यः परहितप्रतिपन्नः समाहितचेताः शिष्याणां कृतरक्षासंविधानो मङ्गलपूर्वकं महता प्रयत्नेन सूत्राणि प्रणीतवान् । तत्राशक्यमेकेन वर्णनाप्यनर्थकेन भवितुम, किं पुनरियता सूत्रप्रबन्धेन इत्यतः वचनमिदमनर्थकमस्तीति वक्तुं न शक्यते।

(ख). वृद्धिशब्दस्यादैचां च साधुत्वमनेन विधीयत इति विज्ञातुम् न शक्यते, लक्षणान्तरेण तेषां साधुत्वस्य विधानात् । तथा हि वृद्धिशब्दोऽयमविशेषेणचोपदिष्टः । वृध्–धातोः क्तिन्प्रत्यये **'स्त्रियां क्तिन्'** (पा. सू. ३।३।९४), **'झषस्तथोर्धोऽधः'** (पा. सू. ८।२।४०) इति धत्वे, **'झलां जश् झशि'**(पा. सू. ८।४।५३) इति धकारस्य दकारे च वृद्धिशब्दः सिद्ध्यति । आदैचोऽप्यक्षरसमाम्नाय उपदेशात् । ऐचोऽक्षरसमाम्नाय उपदेशः, नाकारस्येति चेत्? अवर्णजातेरुपदेशात् सोऽपि गृह्यत एवेत्यदोषः । **'अणुदित्सवर्णस्य चाप्रत्ययः'** (पा. सू. १।१।६९) इत्यकारेण गृह्यमाणेनाकारस्यापि ग्रहणाच्च।

(ग). प्रयोगनियमार्थमप्येतन्नार्हति भवितुम् । **'सिचिवृद्धिः...'** (पा. सू. ७।२।१), **'मृजेर्वृद्धिः'** (पा. सू. ७।२।११४) इत्यादावनादैच्परस्य वृद्धिशब्दस्य प्रयोगो नोपपद्यते । कथं हि नाम स्वयमेव नियमं कृत्वा तमनादैच्परं प्रयुञ्जीत ?

(घ). आदेशार्थमप्येतच्छक्यते न विज्ञातुम् । यदि ह्यादैचामनेन वृद्धिशब्द आदेशो विधीयेत, य एते निर्देशाः **'यातिवातिद्रातिप्साति।।'** (पा. सू. ८।४।१७) , **'रायो हलि'**(पा. सू. ७।२।८५), **'नावो द्विगोः'**(पा. सू. ५।४।९९) नोपपद्येरन् । अथ वृद्धिशब्द-स्यादैच आदिश्येरन्, एवमपि **'इद्वृद्धौ।।'** (पा. सू. ६।३।२८) , **'वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे'** (पा. सू. ६।३।३९) इत्येवमादयो निर्देशा न सम्भवेयुः।

(ङ). आगमार्थमप्येतन्नोपपद्यते । न ह्यादैचां वृद्धिशब्द आगमे विहिते तस्य वा तेषु पूर्वोक्ता निर्देशा उपपद्यन्ते । आदेशविधाने स्थान्यादेशसम्बन्धे षष्ठ्या भवितव्यम्, आगमविधानेप्यवयवावयविसम्बन्धे, न चेह षष्ठी विद्यते, तस्मात् षष्ठ्या अभावान्नेदमादेशार्थम्, नाप्यागमार्थम् इति।

(च). विशेषणविशेष्यभावप्रसिद्ध्यर्थमप्येतन्न सम्भाव्यते । तथा हि सम्भवव्यभिचारे च सति विशेषणविशेष्यभावो भवति, नीलोत्पलवत्। न चेहादैचां वृद्धिशब्दे तस्य वा तेषु सम्भवः।

(छ). तस्मात् पारिशेष्यात् सञ्ज्ञासञ्ज्ञिसम्बन्धार्थमेवैतदिति । तत्र वृद्धिशब्दः संज्ञा, आदैच् संज्ञिनः, विपर्ययस्य तु न सम्भावना सज्ञाकरणस्य लघ्वर्थत्वाद् । किञ्चावर्तिन्यः सञ्ज्ञा भवन्ति । वृद्धिशब्दश्चावर्तते, नादैच्छब्दः तदुक्तं महाभाष्ये–

**एतत् कुतो लभ्यते? वृद्धि-शब्दः सञ्ज्ञा, आदैचः सञ्ज्ञिनः इति । विपर्ययः कस्मान्न भवति, आदैचः सञ्ज्ञा, वृद्धिशब्दः सञ्ज्ञी इति ? नार्हति विपर्ययो भवितुम् । तथा हि, लघ्वर्थत्वात् सञ्ज्ञाकरणस्य, यस्मिन्नुच्चार्यमाणे प्रदेशेषु लाघवं भवति तस्य सञ्ज्ञार्थत्वेन भाव्यम् । वृद्धिशब्दे च विभक्तिकेऽप्युच्चार्यमाणे लाघवं भवति, नादैक्षु; यस्माद्वृद्धिशब्द उच्चार्यमाणे चतस्रो मात्रा भवन्ति, आदैक्षु तु पञ्च । न चादैचां प्रत्येकंसञ्ज्ञाभावाल्लाघवं भवतीति शक्यं परिकल्पयितुम्, प्रयोजनविशेषमन्तरेणैकस्थाने सञ्ज्ञाविधानस्य निष्फलत्वात् । किञ्चावर्तिन्यः सञ्ज्ञा भवन्ति । वृद्धिशब्दश्चावर्तते, नादैच्छब्दः तस्मान्न भवति विपर्ययः** (पतञ्जलिः, ई. २०२५, पृ. १२९) इति ।

एतावता व्याख्यानानां प्रदर्शनेन 'वृद्धिरादैच्' सूत्रस्थाः प्रायो विषया दृग्गोचरीभूताः सन्ति । अतः परं सारत्वेन एकत्र विषयदृष्ट्या सूत्रस्थविषया विवेच्यमानाः सन्ति । तथाहि–

### *वृद्धिरादैच्सूत्रविमर्शः*

पाणिनिना रचितेष्वासन्नसहस्रस्चतुष्टये सूत्रेषु प्रथमं सूत्रमस्ति वृद्धिरादैच्  इति । अनेन च आ ऐ औ इत्येतेषां वर्णानां वृद्धिसंज्ञा विधीयते । तत्राष्टाध्याय्यां भगवता पाणिनिना मङ्गलपदस्य रूपेणादौ वृद्धिशब्दः प्रयुक्तो वर्तते, तथा च भाष्यम्– **माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं वृद्धिशब्दमादितः प्रयुङ्क्ते** (पतञ्जलिः, ई. २०२५,१२३) । लोके च वृधुँवृद्धौ (पाणिनिः, धा. पा. ०८६३) इत्यस्मात् **'स्त्रियां क्तिन्'** इति सूत्रेण क्तिन्प्रत्यये सिद्धस्य वृद्धिपदस्यार्थः वर्धनम्, ऋद्धिः, सिद्धिः, लक्ष्मीः, श्रीः, मङ्गलञ्चेत्यादयः सन्ति । अत उपर्युक्तव्याख्यानानां समेषां भाष्यव्याख्याने तात्पर्यमिति निर्णीय महाभाष्यानुसारेण सूत्रस्थविषयाः विविच्यन्ते ।

### *सूत्रस्थपदविवरणम्*

कस्यचिदपि सूत्रस्य व्याख्यानञ्च **'पदच्छेदः पदार्थोक्तिर्विग्रहो वाक्ययोजना'** इत्याद्यभियुक्तोक्तेरनुसारेण कर्तव्यं भवति । अतः अत्र सूत्रे कति पदानि ? इति विचारः कर्तव्यः । यदि द्विपदमिदं सूत्रम् - वृद्धिः आदैच् इति, तर्हि आदैच् इत्यत्र को विग्रहः? आत् च ऐच् च इति इतरेतरयोगद्वन्द्व उत वा समाहारः । समाहारः तावद् भवितुं नार्हति, वाक्त्वचम् इत्यादौ इव **'द्वन्द्वाच्चुदषहान्तात्समाहारे'** (पा. सू. ५।४।१०६) इति समासान्तस्य टच आपत्तेरिति चेद् न समासान्तविधेरनित्यत्वेन दोषस्य वारणसम्भवात् । तत्र च **'प्रतेरंश्वादयस्तत्पुरुषे'** (पा. सू. ६।२।१९३) इत्यत्र अन्तोदात्तत्वाय अंश्वादिषु राजञ्छब्दस्य पाठो ज्ञापकः । तथा हि तत्र पाठस्य प्रयोजनं 'प्रतिराजा' इत्यत्र अन्तोदात्तो यथा स्यादिति । समासान्तविधेर्नित्यत्वे तु **'राजाहः सखिभ्यष्टच्'** (पा. सू. ५।४।९१) इत्यनेन टजन्तत्वादेवान्तोदात्तत्वे सिद्धे अंश्वादिषु राजञ्छब्दस्य पाठो व्यर्थः स्यात् । न चैवमितरेतरयोगद्वन्द्व एवाश्रीयताम् । तस्मिन् सति समाहारे विधीयमानस्य टचः प्रसक्तिः एव नेति वाच्यम्; इतरेतरयोगद्वन्द्वे द्विवचनान्ततापत्तेः । न च सौत्रम् एकवचनम्, गौरवात् । समासान्तविधेर्नित्यत्वपक्षे तु वृद्धिः, आत्, ऐच् इति त्रिपदम् एव सूत्रम् । अत्र मानन्तु वृद्धिः, आत्, ऐच् इति भाष्यकारस्य वचनमेव । अस्मिन् पक्षे वृद्धिशब्दः आत्, ऐच् इत्येवं पदद्वयेनाऽपि आवृत्त्या योजनीयः।

***'आदैच्' इत्यत्र चकारस्य कुत्ववारणम्***

अस्मिन् सूत्रे आदैच् इत्यत्र पदान्ते विद्यमानस्य चकारस्य वस्तुतः **'चोः कुः'** (पा. सू. ८।२।३०) इत्यनेन कुत्वे कृते गकारो भवितुमर्हति । परन्तु **'छन्दोवत्सूत्राणि भवन्ति'** इति वचनेन एतत् सूत्रं छन्दसः वचनम्मत्वा **'अयस्मयादीनि च्छन्दसि'**(पा. सू. १।४।२०) इत्यत्र निर्दिष्टे अयस्मयादिगणे ऐच्पदस्य समावेशं कृत्वास्य भसंज्ञा क्रियते, येन एकसंज्ञाधिकारमनुसृत्य पदसंज्ञा निषिध्यते, येन चानिष्टं कुत्वमपि निवार्यते । न चैवं 'वृद्धिरादैजदेङ्' इति संहितापाठेऽपि पदान्तत्वाभावेन पदत्वनिमित्तकं चकारस्य **'झलां जशोऽन्ते'**(पा. सू. ८।४।५३) इति जश्त्वमपि कथम् ? जश्त्वे कर्तव्ये पदसंज्ञास्ति, कुत्वे कर्तव्ये सा नेति कथनमर्धजरतीयमिति वाच्यम्, छन्दसि यथायोग्यमुभयोरपि संज्ञयोः सम्भवात् । तद्यथा **'स सुष्टु भा स ऋक्वता गणेन'** इत्यत्र 'ऋक्वता' इति पदे पदत्वात् कुत्वं भवति । जश्त्वे कर्तव्ये तु भसंज्ञैवेति पदत्वस्य प्रतिबन्धेन तन्निमित्तकस्य जश्त्वस्याप्यभावः । अत्र च मानम् **'अयस्मयादीनि छन्दसि'** इति सूत्रमेव । तस्य सूत्रस्य च अयमर्थः - एतानि छन्दसि साधूनि । भपदसंज्ञाधिकाराद् यथायोग्यं संज्ञाद्वयं बोध्यमिति । एवञ्चात्रैतत्सूत्रप्रामाण्यादर्धजरतीयं सोढव्यमेव इति भावः । प्रकृते च 'वृद्धिरादैजदेङ्' इति संहितापाठे जश्त्वस्य दर्शनाद् जश्त्वं प्रति पदसंज्ञास्ति, कुत्वं प्रति सा नेति निश्चीयते ।

***संज्ञाशास्त्रत्वनिर्णयः***

अथ आदैच्च वृद्धिसंज्ञः स्यादिति सूत्रार्थे संज्ञेति पदं कुतो लभ्यते? न ह्यत्र सूत्रे तद्वर्तते । नाप्यनुवृत्तेः तस्य सम्भवः । अस्यैवाष्टाध्याय्यां प्रथमसूत्रत्वात् । एवञ्चास्य सूत्रस्य संज्ञापदघटितमर्थवर्णनमयुक्तम् । अथ संज्ञापदघटितमेवार्थवर्णनं यद्यिष्येत तर्हि, 'अथ संज्ञा' इत्यधिकारसूत्रमेतस्मात्सूत्रात्प्राक् पठनीयम् । तदैव च 'वृद्धिरादैच्' इत्यादीनां संज्ञासूत्रत्वं सिध्येत् । किञ्च वृद्धिरित्यादीनां संज्ञात्वेनानवगमे बहुसूत्रं प्रकरणमनर्थकं स्यात् । तथा च 'अथ संज्ञा' इत्यधिकारसूत्रं कर्तव्यम् । तदुक्तम् **'संज्ञाधिकारः संज्ञासम्प्रत्ययार्थः'**(पतञ्जलिः, ई. २०२५, पृ. १२३)इति । किञ्च कृतेऽपि तस्मिन् वृद्धिशब्दः संज्ञा भवति, आदैचो वेति सन्देहो न निवर्तते । अतः सन्देहस्यास्य निवृत्तये संज्ञासंज्ञिविषयकस्य सन्देहस्य निवर्तकः कश्चन शब्दो वक्तव्यः, परा संज्ञा, पूर्वः संज्ञीति वक्तव्यम् । न च कलादिना वर्णदोषेण किञ्चिद् लिङ्गमासज्योच्यतामित्यंलिङ्गा संज्ञा इति । वृद्धिशब्दे च तल्लिङ्गः करिष्यते, न 'आदैच्' इति शब्दे । एवञ्च लाघवमप्यस्तीति बोध्यम् । तथा हि-धात्वादिपठितेषु ङकारादिष्वनुबन्धेषु कलादिकमासक्ष्यते । ततश्च तेषां संज्ञात्वे सति **'डादात्मनेपदम्'** इति करिष्यते । संज्ञाश्च संज्ञिनं प्रत्याय्य स्वयं निवर्तन्ते इतीत्संज्ञा लोपश्च न वक्तव्यौ भवत इति यावत् । तथा च प्रतिसंज्ञं कलादिलिङ्गानामासञ्जनम्, इत्थंलिङ्गा संज्ञा इति चोच्यतामिति चेत्, न; अपाणिनीयत्वापत्तेः। तथा च भाष्यम्- 'अपाणिनीयन्तु भवति' (पतञ्जलिः, ई. २०२५, पृ. १३०) इति । न चेष्टापत्तिः, अनन्तस्थलेषु दोषविशिष्टानां पठने आनुनासिक्यादिवत् प्रतिज्ञाकरणे चात्यन्तगौरवात्, दुर्जेयत्वाच्च । न च यथान्यासे संज्ञासंज्ञिविषये सन्देह एवेति वाच्यम्, सर्वत्र सन्देहाभावस्य लोकन्यायत एव सिद्धत्वात् । तद्यथा आकृतिमतो मांसपिण्डस्य देवदत्त इति संज्ञा क्रियते । एवम् इहापि अनाकृतिः संज्ञा,आकृतिमन्तः संज्ञिन इति दोषाभावात् । यद्वा वृद्धिशब्दस्य एकत्वात् संज्ञात्वम् । आदैचो बहुत्वात् संज्ञित्वं च, संज्ञाकरणस्य लघ्वर्थत्वात् । यथा- 'सर्वादीनि सर्वनामानि' इत्यनेन अनेकस्य एका संज्ञा क्रियते । न तु एकस्य अनेकाः संज्ञाः । प्रयोजनाभावात् । न च प्रत्ययः, कृत्, कृत्या इति एकस्यैव

बहुव्यः संज्ञाः क्रियन्त इति पूर्वोक्तयुक्तेः भङ्ग इति वाच्यम्,तत्रापि न केवलमेकस्यैव प्रत्ययः, कृत्, कृत्या इत्यनेकसंज्ञाः, किन्तु, बहूनामेव तासां सम्भवेनादोषात् । किञ्चाचार्याणामाचारात् संज्ञासंज्ञ्यसन्देहः सिद्धः। वृत्तिकारस्य व्यवहारादेकस्य संज्ञात्वमपरस्य संज्ञित्वमिति निर्णीते का संज्ञा, कः संज्ञीति सन्देह एव नोदेतीति भावः । एवं दूरीकृतः संज्ञासंज्ञिविषये सन्देहः । तथाप्येषां संज्ञात्वसिद्धये 'अथ संज्ञा' इत्यधिकारसूत्रं कर्तव्यमेवेति चेत्, न, आचार्याचारादेव संज्ञात्वस्यावगतेः । आचार्याणां व्यवहारादेव संज्ञात्वावगतिर्भवति । तद्यथा लोके मातापितृभ्यां जातस्य पुत्त्रस्य श्रोतृजनासन्निहितेऽवकाशे नाम कुर्वाते देवदत्तो, यज्ञदत्त इति । मातापित्रोर्व्यवहारादन्येऽपि जानन्ति – इयमस्य संज्ञा इति। वेदेऽपि याज्ञिकाः संज्ञां कुर्वते खड्गसदृशस्य यज्ञसाधनस्य खादिरकाष्ठस्य स्फय इति, तक्षणादिना संस्कृतस्य पशुनियोजनकाष्ठस्य यूप इति, यूपाग्रे स्थाप्यमानस्य यूपवलयभूतस्य काष्ठस्य चषाल इति च । तेषां व्यवहाराद् अन्येऽपि जानन्ति इयमस्य संज्ञा इति । एवमिहापि वृद्धिः संज्ञा, आदैचः संज्ञिन इति आचार्या आहुः। 'सिचि वृद्धिः॥' इत्यादौ वृद्धिपदस्य आकारैकारीकारान् उदाहरन्ति च । तेन इदं लभ्यते - यया प्रत्याय्यन्ते सा संज्ञा, ये प्रतीयन्ते ते संज्ञिन इति । एवञ्च आचार्याचारादेव संज्ञात्वस्य संज्ञासंज्ञ्यसन्देहस्य च सिद्धत्वाद् अथ संज्ञा इत्यधिकारमूलं, संज्ञासंज्ञ्यसन्देहश्च न वक्तव्यमिति भाष्ये स्थितम् ।

### *अन्योन्याश्रयदोषपरिहारः*

ननु अत्र सूत्रे आदैचां वृद्धिसंज्ञा विधीयते । वृद्धिसंज्ञया च आदैचो भाव्यन्ते । एतत् इतरेतराश्रयं भवति। इतरेतराश्रयाणि च कार्याणि न प्रकल्पन्ते । तद्यथा-नौः नावि बद्धा नेतररक्षणाय भवति । न च इतरेतराश्रयस्य कार्यस्य प्रसिद्धिः, यथा नौः शकटं वहति, शकटं च नावं वहति इति वाच्यम्, तत्र अन्यदेव किञ्चिद् भवति जलं, स्थले वा,स्थले शकटं नावे वहति, जले नौः शकटं वहतीति युक्त एव व्यवहारः । यथा तर्हि मिथः सम्बद्धाः नयो वेणवः परस्पराश्रिता अपि ते परस्परं धारयन्तीति वाच्यम्, तत्रापि अन्ततः सूत्रकस्य सत्त्वाद् व्यवहारस्य युक्तत्वात् । एवं तत्र तत्र अन्योन्याश्रये वारितेऽपि प्रकृते अनिवारणाद् दोष एवेति चेत्, अत्रोच्यते- नित्याः शब्दाः । नित्येषु शब्देषु सताम् आदैचां वृद्धिसंज्ञा विधीयते । संज्ञया च आदैचो न निष्पाद्यन्त इति इतरेतराश्रयाभावः । न च शब्दानां नित्यत्वे व्याकरणशास्त्रस्य वैयर्थ्यापत्तिरिति वाच्यम्; शास्त्रस्य अन्यार्थस्य प्रकृतौ निवर्तकत्वेनऽदोषात् । तद्यथा मृजूशुद्धौ इति मृज्धातुः प्रत्ययविशेषमनाश्रित्यैव पठितो धातुपाठे । तस्य सर्वत्र मृजिबुद्धिः प्रसक्ता । तत्र 'मृजेर्वृद्धिः' इत्यनेन निवृत्तिः क्रियते मृजेः अकिङित्सु प्रत्ययेषु मृजिप्रसङ्गे मार्जिः साधुः भवतीति ।

### *वृद्धिसंज्ञा प्रत्येकं न तु समुदायस्य*

अथ आदैच्च वृद्धिसंज्ञः स्यादित्यर्थे आदैचोः समुदायस्यैव वृद्धिसंज्ञायाः प्राप्त्या केवलस्याकारस्यैकारस्यौकारस्य वा सा न प्राप्नोति । तथा च तेषां प्रत्येकं संज्ञायाः सिद्धये सूत्रे 'प्रत्येकम्' इति वचनं कर्तव्यं, 'वृद्धिरादैच् प्रत्येकमिति यथा । मैवम्; यत्रेच्छति सहभूतानां कार्यम्, आचार्यः तत्र सहग्रहणं करोत्येव । तद्यथा -'सह सुपा' इति । एवञ्च समुदायस्य प्रतिपत्तिः यत्र साध्यैव इति तदभावे तदप्रतिपत्तिरेव भविष्यतीति वाच्यम्, लोकन्यायेन यत्नाभावेऽपि समुदायस्य प्रतिपत्तौ तद्विरोधापत्तेः । तथा हि - **'गर्गाः शतं दण्ड्यन्ताम्'** इति व्यवहारो वर्तते । अत्र शतं प्रधाने, न तु गर्गाः, **'अर्थिनश्च राजानो हिरण्येन भवन्ति'** इति वाक्यशेषस्य सत्त्वात् । गर्गाः गुणकर्म एव । न च गुणभेदे प्रधानस्य भेद इति शतदण्डनं समूहे परिसमाप्यते ।

एवञ्च समुदायेऽपि वाक्यपरिसमाप्तौ 'सह सुपा' इत्यादौ सहभूतानां कार्यार्थं सहग्रहणं न कार्यम् । तथा च समुदायस्य प्रतिपत्तेः अयत्नसाध्यत्वात् 'वृद्धिरादैच्' इत्यादौ अपि समुदायावगतौ दोष एव इति वाच्यम्, प्रत्यवयवं वाक्यपरिसमाप्तौ दोषाभावात् । तद्यथा - **'देवदत्तयज्ञदत्तविष्णुमित्राः भोज्यन्ताम्'** इति व्यवहारो वर्तते। न चोच्यते 'प्रत्येकम्' इति । तथापि भुजिक्रिया प्रत्येकम् एव परिसमाप्यते । एवम् इहापि प्रत्यवयवं वाक्यपरिसमाप्तौ प्रत्येकमिति पदस्याभावेप्याकारादीनां प्रत्येकं वृद्धिसंज्ञायाः सिद्धेः वृद्धिसंज्ञाविधायके सूत्रे प्रत्येकमिति वचनं नावश्यकं भवति ।

***तद्भावितातद्भावितयोर्विचारः***

नन्वत्र सूत्रे किदृशाः आकारैकारौकारा वृद्धिसंज्ञकाः । तत्र क्वचिद् 'मृजेर्वृद्धिः' इत्यादौ वृद्धिपदेन वृद्धिः विधीयते । क्वचिच्च तदभावेऽपि 'आ सर्वनाम्नः' इत्यादौ आकारो विधीयते । तत्र किं वृद्धिः इत्येवमुच्चार्य विहितानामेव तत्त्वमुत सर्वेषाम् आकारैकारौकाराणाम् ? उभयथापि शास्त्रे दर्शनाद् विनिगमनाविरहः । तथा हि लुश्लुलुप्च्छब्दैः कृतस्य प्रत्ययादर्शनस्यैव तत्तत्संज्ञकत्वम् । टिघुभादिषु संज्ञास्वतद्भावितानामेव ग्रहणं दृश्यत इति सोऽपि पक्षः शङ्कितुमुचित इति चेत्न, तत्र तद्भावितानामसम्भवाद् अतद्भावितानामेव ग्रहणं भविष्यति, न च तथा प्रकृते; 'वृद्धिरादैच्' इत्यत्र वृद्धिपदमावर्त्य एकं वृद्धिपदं वृद्धिशब्देन विहितपरं सद् आदैज्विशेषणम् । अपरं तत्संज्ञापरमिति रीत्या वृद्धिशब्देन विहिता य आदैचः ते वृद्धिसंज्ञका भवन्ति इत्यर्थस्यापि सम्भवात् ।

अत्र तद्भावितपक्षस्य स्वीकारे वृद्धिशब्दमुच्चार्य विहितानामाकारैकारौकाराणामेव वृद्धिसंज्ञा भवततीति हेतोः मालाशब्दे आकारस्य स्वतो वर्तमानत्वेनैतत्संज्ञाया अभावेन मालाशब्दस्य **'वृद्धिर्यस्याचामादिस्तद्वृद्धम्'** (पा. सू. १।१।७३) इति वृद्धसंज्ञाया अप्यभावेन **'वृद्धाच्छः'** (पा. सू. ४।२।११४) इति सूत्रेण विधीयमानः छप्रत्ययो न स्यात् । तदभावे 'मालीयः' इति रूपस्यासिद्धिः । एवं 'शालीयः' इत्यत्रापि । तथा आम्रशब्दे आकारस्य वृद्धिसंज्ञाया अभावे तत्समुदायस्य वृद्धसंज्ञाया अप्यभावेन तस्माद् **'नित्यं वृद्धशरादिभ्यः'** (पा. सू. ४।३।१४४)इति सूत्रेण विधीयमानो मयट् न स्यात् । आम्रमयमिति रूपस्यासिद्धिश्च । तथा आम्रगुप्तशब्दस्यापि तथात्वेन तस्मादुक्तरीत्या **'उदीचां वृद्धादगोत्रात्'**(पा. सू. ४।१।१५७)इति सूत्रेण विधीयमानः फिञ्प्रत्ययोऽपि न स्यात् । आम्रगुप्तायनिः इति रूपमपि न सिध्येत् । न च अत्र वृद्धत्वाभावेऽपि दोषो न । अवृद्धत्वनिमित्तकेन **'प्राचामवृद्धात्फिन् बहुलम्'** इति सूत्रेण विधीयमानेन फिना रूपस्य सिद्धिरिति वाच्यम्; उदीचां फिञ्, प्राचां फिन् इति व्यवस्थायाः सत्त्वेन उदीचां फिनः अनिष्टत्वेन तेषां तदन्तस्यासाधुत्वप्रसङ्गः । तस्माद् आदैज्मात्रस्य ग्रहणमिति पक्ष एवात्र स्वीकर्तव्यः । अस्मिन् पक्षे सर्वेषामाकारैकारौकाराणां वृद्धिसंज्ञायाः सत्त्वेन शालादिशब्दे दोषाभावः। अत्र भाष्ये समाधानान्तरमपयुक्तम् । यः कृत्स्नाया वृद्धेः निमित्तं भवति, तत्रैवास्य सूत्रस्य प्रवृत्तिरिति । तावच्छब्दे च वतुप्रत्ययः केवलमाकारस्यैव निमित्तम्, न तु त्रयाणामाकारैकारौकाराणामिति । तत्रास्य सूत्रस्याप्रवृत्त्या दोषाभावः । तस्मात् सर्वेषामाकारैकारौकाराणां वृद्धिसंज्ञायां दोषाभावेन आदैज्मात्रग्रहणमिति पक्षः भाष्ये सिद्धान्तितः । आचार्योविश्वेश्वरसूरि च आह– **आदैचामविशेषेण वृद्धिसंज्ञा** (विश्वेश्वर, १९९५, पृ. ६४) इति ।

*तपरकरणस्य प्रयोजनम्*

अथ अत्र सूत्रे आकारस्य तपरकरणं किमर्थम्? न चातत्कालानां ग्रहणं मा भूदित्येतदर्थं तत्। व्यक्तिपक्षे आकारस्य अनण्त्वेन सवर्णग्रहणस्य अप्रसक्तेः। मैवम्, गुणाऽभेदकाः। अत एव उदकम् एकम् अपि तस्य शीतम् उदकम्, उष्णम् उदकम् इति गुणभेदात् अन्यत्त्वेन व्यवहारः। तदुक्तं भाष्ये 'एकोऽयमात्मा ' इत्यादि। तत्र भाष्ये आत्मन्शब्दो द्रव्यवाची इत्यत उदकस्य कथमात्मत्वमिति प्रश्नस्याप्रसक्तिः भवति। एवञ्च गुणानां भेदकत्वाद् यद्गुणस्य यत्रोच्चारणम्, तद्गुणस्यैव तत्र ग्रहणं स्यात्। गुणान्तरयुक्तानां ग्रहण न स्यात्। गुणान्तरयुक्तानामपि ग्रहणं यथा स्यादित्येवमर्थं तपरकरणमावश्यकम्।

मैवम्; अभेदका अपि गुणाः। अत एव मुण्ड्यपि जट्यपि शिख्यपि देवदत्तः स्वामाख्यां न जहाति। न चैवं गुणेषु उभयथाङ्गीकारे खण्डिकोपाध्यायस्य शिष्याय चपेटादानं विरुध्येतेति वाच्यम्, आम्नायशब्दा नियतस्वरा इति वेदे गुणानां भेदकत्वम्। लोके तु उभयथा। शास्त्रे तु कथम्? इति चेत्; तत्र अभेदका गुणा इत्येव न्याय्यम्। अत्र च मानम् **'अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः'** (पा. सू. ७।१।७५) इति सूत्रे उदात्तग्रहणमेव। अन्यथा गुणानां भेदकत्वे उदात्तगुणसहितस्योच्चारणेनैव सिद्धे किम् उदात्तग्रहणेन ? एवञ्च गुणानाम् अभेदकत्वे उदात्तगुणसहितस्योच्चारणेऽपि इतरगुणसहितानामपि ग्रहणं स्यात्, तन्मा भूत् इत्येतदर्थमुदात्तग्रहणमिति स्वांशे चारितार्थम्। न चैवं गुणानामभेदकत्वे सिद्धान्तितेऽनुदात्तादेः यदुच्यते, तत् स्वरितादेरपि स्यात्, अन्तोदात्ताद् यदुच्यते, तत् स्वरितान्तादपि प्राप्नोतीति वाच्यम्; आश्रीयमाणो गुणो भेदको भवतीति स्वीकारेणादोषात्। तद्यथा -'शुक्लम् आलभेत' इति। तत्र यः शुक्ल आलब्धव्ये कृष्णमालभते, न हि तेन यथोक्तं कृतं भवति। एवमनुदात्तादरित्यादावनुदात्तादेराश्रीयमाणत्वाद् न दोषः। एवञ्च गुणानामभेदकत्वात् तपरकरणाभावेऽप्युदात्तादीनां सर्वेषां ग्रहणे सिद्धे तदर्थं क्रियमाणं तपरकरणं व्यर्थम्। न च तपरकरणाभावे आ ऐच् इति स्थिते वृद्धौ सत्याम् ऐच् इत्युच्यमाने सन्देहः स्यात्, किमिमौ ऐकारौकारौ एव, उत आकारोऽप्यत्र निर्दिश्यत इति। एवञ्च असन्देहार्थं तपरकरणमस्तु इति वाच्यम्; व्याख्यानतः सन्देहस्य निवृत्तेः सम्भवात्। त्रयाणाम् आकारैकारौकाराणां ग्रहणमिति व्याख्यानेन च निर्णयः। अत एव **'औतोऽम्शसोः'** (पा. सू.६।१।९३) इत्यादौ आ ओत इति छेदः इत्यादि सङ्गच्छते। तदुक्तम् – **'व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्'** (नागेशः, २००९, परिभाषा१) इति। तथा च तपरकरणं किमर्थम् ? इति चेत्, ऐजर्थम्। तः परो यस्मादित्येव विग्रह इति न, तादपि परः तपर इति पञ्चमीतत्पुरुषस्यापि सम्भवात्। अत एव **'सहिवहोरोदवर्णस्य'** (पा. सू. ६।३।११२) इत्यत्र वर्णग्रहणं सङ्गच्छते। तत्र वर्णग्रहणस्येदं प्रयोजनम् - तपरकरणेन दीर्घादीनां व्यावृत्तौ प्राप्तायां तन्मा भूदिति। तात्परः अपि इत्येवं पञ्चमीतत्पुरुषस्य अभावे तपरकरणस्यातिप्रसङ्गाभावेन तत्परिहाराय क्रियमाणं वर्णग्रहणमनर्थकं स्यात्। एवञ्च कृष्णैकत्वम्, गङ्गौघ इत्यादामान्तर्यतः त्रिमात्रचतुर्मात्राणां स्थानिनां त्रिमात्रचतुर्मात्रा आदेशाः प्राप्नुवन्ति। द्विमात्रा एव यथा स्युः इत्येवमर्थं तपरकरणम्। कृते तु तस्मिन् द्विमात्राणाम् एव वृद्धिसंज्ञायाः सम्भवेन त्रिमात्रचतुर्मात्रा आदेशा न भविष्यन्ति। तथा च ऐजर्थं तपरकरणमिति भाष्ये स्थितम्॥

*वृद्धिसंज्ञायाः प्रयोजनानि*

अष्टाध्याय्यां वृद्धिसंज्ञानुस्यूतानि नैकानि सूत्राणि सन्ति । यथा– **'वृद्धिरेचि'** (पा.सू.६।१।८८) इदं सूत्रमादेचि परे पूर्वपरयोर्वृद्धिरेकादेशं करोति। तेन कृष्णैकत्वमित्यादयः प्रयोगाः सिद्धयन्ति। **'अत उपधायाः'** (पा. सू. ७।२।११६) इत्यनेन अकारस्य वृद्धिर्विधीयते । तेन च पठ्धातोर्घञि प्रत्यये आकारवृद्धौ 'पाठः' इति सिद्धति । **'अचो ञ्णिति'** (पा. सू. ७।२।११५) इत्यनेन इकारस्य उकारस्य च वृद्धिः विधीयते । तेन नीधातोर्ण्यन्ताद् ण्वुलि नायकः इत्यादौ इकारस्य स्थाने ऐकारवृद्धिः सिद्ध्यति। **'तद्धितेष्वचामादेः'** (पा. सू. ७।२।११७) इत्यनेन उकारस्य वृद्धिः विधीयते। तेन च उवर्णस्य स्थाने वृद्धिसंज्ञकः औकारः आदिश्यते। यथा – औपगवः।

अष्टाध्याय्यां 'वृद्धिः' इयं संज्ञा नवसु सूत्रेषु साक्षात् प्रयुक्तास्ति — १**. 'इको गुणवृद्धी'** (पा. सू. १।१।३) गुणवृद्धिशब्दाभ्यां यत्र गुणवृद्धी विधीयेते तत्र इक इति षष्ठ्यन्तं पदमुपतिष्ठते । यथा **'मृजेर्वृद्धिः'**(पा. सू. ७।१।२४)। २. **'वृद्धिर्यस्याचामादिस्तद्वृद्धम्'** (पा. सू. १।१।७३) यस्याचां मध्ये आदिः अच्वृद्धिः स वृद्धसंज्ञः स्यात्। यथा – शालीयः, मालीयः । ३. **'वृद्धिरेचि'** (पा. सू. ६।१।८८) अवर्णादेचि परे पूर्वपरयोः स्थाने वृद्धिसंज्ञक एकादेशो भवतीति वृद्धिरेचि इत्यस्यार्थः । यथा, वन + ओषधिः इत्यत्र अकार-ओकारयोः स्थाने औ इति वृद्धिरेकादेशो भवति। ४. **'उत्तरपदवृद्धौ सर्वं च'** (पा. सू. ६।२।१०५) ५. **'इद्वृद्धौ'** (पा. सू. ६।३।२८), ६. **'वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे'** (पा. सू. ६।३।३९), ७. **सिचि वृद्धिः परस्मैपदेषु** (पा. सू. ७।२।१) ८. **मृजेर्वृद्धिः** (पा. सू. ७।२।११४) ९. **उतो वृद्धिर्लुकि हलि** (पा. सू. ७।३।८९)

अनुवृत्तिरूपेण त्वन्येषु सूत्रेष्वपि वृद्धिसंज्ञायाः प्रभावोऽस्ति। अधोलिखितसूत्रेषु परम्परासम्बन्धेन वृद्धिसंज्ञायाः उपयोगः। तथाहि **'वृद्धिर्यस्याचामादिस्तद् वृद्धम्'** (पा. सू. १।१।७३) इति सूत्रेण हि यस्याचां मध्ये आदिरच् वृद्धिर्भवति तस्य वृद्धसंज्ञा विधीयते। वृद्धसंज्ञाघटितानि सूत्राणि तावद् –

**'अवृद्धाभ्योनदीमानुषीभ्यस्तन्नामिकाभ्यः'**(पा. सू. ४।१।११३), **'वृद्धाट्ठक् सौवीरेषुबहुलम्'** (पा. सू. ४।१।१४८), **'उदीचां वृद्धादगोत्रात्'** (पा. सू. ४।१।१५७)**,'वृद्धेत्कोसलाजादाञ्ञ्यङ्'**(पा. सू. ४।१।१७१), **'प्राचामवृद्धात् फिन् बहुलम्'** (पा. सू. ४।१।१६०), **'वृद्धात् प्राचाम्'** (पा. सू. ४।२।१२०), **'अवृद्धादपि बहुवचनविषयात्'** (पा. सू. ४।२।१२५), **'वृद्धाच्छः'**(पा. सू. ४।२।११४), **'वृद्धादकेकान्तखोपधात्'** (पा. सू. ४।२।१४१), **'नित्यं वृद्धशरादिभ्यः'**(पा. सू. ४।३।१४४), **'प्रस्थेऽवृद्धमकर्क्यादीनाम्'** (पा. सू. ६।२।८७ ) इति।

*'वृद्धिरादैच्' इति सूत्रारम्भकाले पाणिनेर्हृदयम्*

एतावता 'वृद्धिरादैच्' इति सूत्रस्योपर्युक्तव्याख्यानस्यालोडनस्य पश्चादालेखस्यास्योपसंहारे लक्ष्मीटीकाकारस्य निर्णयस्य प्रकाशनेन च एवमधिगतो भवति – (सभापतिशर्मोपाध्यायः,सन्१९६६,पृ.५८,५९)

(क) वृद्धिसंज्ञायाः प्रत्याहारसंज्ञोपजीव्यत्वेनवृद्धिसंज्ञातः प्रत्याहारसंज्ञा पूर्वमारब्धव्या सत्यपि प्रत्याहारप्रपञ्चतः वृद्धिसंज्ञायाः प्रथममारभणमष्टाध्याय्यां संज्ञासूत्रेषु पूर्वं संज्ञीपदानां स्थापनस्य पाणिनेः शैलीतः विलक्षणतया **'वृद्धिरादैच्'** इति सूत्रे आदौ वृद्धिपदं स्थापयित्वा शिष्यशिक्षायै सम्भावितविघ्ननाशाय च मङ्गलमाचचार पाणिनिरिति ज्ञायते।

(ख) "वृद्धिरादैच् इति सूत्रे पदत्रयं स्वीकर्तव्यं द्विपदत्वे हि **'द्वन्द्वाच् चुदषहान्तात्समाहारे** (पा. सू. ५-४-१०६) इति टजापत्तिः स्यात् । आदैदित्यत्र इतरेतरद्वन्द्वे तु द्विवचनापत्तिः । समासान्तविधेरनित्यत्वाद् न दोष इत्युच्यते तर्हि पदद्वयस्वीकारेऽपि न दोषः । परन्तु पक्षोऽयमनित्यत्वस्यागतिकगतित्वाद् युक्ततरस्तु न भवति ।" इति निर्णयेन 'वृद्धिरादैच्' इति सूत्रारम्भकाल एव पञ्चमाध्यायवर्तिनां सूत्राणां विषयाः, 'समासान्तविधिरनित्यः' इति परिभाषा, अष्टाध्याय्यां परिकल्पिता नित्यानित्यत्वव्यवस्था च पाणिनेर्बुद्धिस्था आसन्नित्यनुमातुं शक्यते।

(ग) "आत्पदस्य षण्णामाकाराणाम्, 'ऐच्' इत्यस्य वर्णद्वयबोधकत्वेऽपि आदित्येकवचनस्य प्रयोगः जात्यभिप्रायेण, ऐजित्येकवचनस्य प्रयोगः तिरोहितावयवभेदसमूहाभिप्रायेण इति बोध्यम् । उद्भूतावयवभेदविवक्षायान्तु बहुवचनं भवत्येव यथा 'झलां जशोऽन्ते' (पा।सू ८-२-३९) इत्यादौ । सूत्रेऽस्मिन् वृद्धिपदं स्वरूपपरं न त्वादैजार्थकम्, 'घटो घट' इतिवत् 'आदैच् आदैच्' इत्यसङ्गतबोधापत्तेः, वृद्धिः संज्ञा, आदैच् संज्ञी इतीष्टार्थबोधानापत्तेश्च । तत्र आत् इति पदेन द्विमात्रकाः षडाकाराः, ऐजिति पदेन द्विमात्रकौ ऐकारौकारौ च संज्ञिनो बोध्याः,आतस्तपरत्वादैचस्तात्परत्वात्। तेन 'कृष्णैकत्वम्' इत्यादौ स्थानिनस्त्रिमात्रकत्वेऽपि द्विमात्रिका एव वृद्धिः, त्रिमात्रचतुर्मात्रकाणां वृद्धिसंज्ञकत्वाभावात् ।" इति व्याख्यानेन 'वृद्धिरादैच्' इति सूत्रस्यारभणकाले एव 'तपरस्तत्कालस्य' इति सूत्रस्य विषयाः, वर्णग्राहकव्यवस्थापरकविषयाः, अन्येषां समेषामध्यायानां सूत्रस्थविषयाश्च पाणिनेर्बुद्धावासन्, तस्य च पाणिनिः प्रथमसूत्र एव सङ्केतं करोतीति ज्ञातुं शक्यते।

(घ) "छन्दोवत्सूत्राणि भवन्ति' इति कथनात् चकारस्य 'चोः कु' इति कुत्वं न। सूत्रेषु छन्दस्त्वातिदेशेन 'अयस्मयादीनि छन्दसि' (पा. सू. १-४-२०) इत्यनेन भत्वात्। वस्तुतस्तु अत एव निर्देशात् सुप्सकारपरत्वाभावे प्रत्याहारघटकस्य चस्य कुत्वं नेति ज्ञाप्यते। अत एव 'उपदेशेऽजनुनासिकः', 'अजादेर्द्वितीयस्य' (पा. सू. १-१-२) 'इजादेः सनुमः' (पा. सू. ८-४-३२) इत्यादिसौत्रनिर्देशाः, 'अज्भिरव्यवहिताः' 'अनुनासिकोऽजित्संज्ञः' 'अजादीनाम्' इत्यादयो दीक्षीतोक्ताश्च सङ्गच्छन्ते । सकारपरत्वाभाव इत्युक्त्या 'अचोऽक्षु' इति भाष्ये कुत्वस्य नासङ्गतिः । सुप्सकारेत्युक्त्या 'अच्सन्धिः' इत्यत्र कुत्वं न।" इत्यादिव्याख्यानेन पाणिनेः 'वृद्धिरादैच्' इति सूत्रस्यारभणकाले एव छन्दसि परिकल्पिताः व्यवस्थाः, अन्याः कतिपयपारिभाषिकसंज्ञाः, ज्ञाप्यज्ञापकभावस्य परिकल्पना, अनन्तरकाले उपदिक्ष्यमाणेषु सूत्रेषु सम्भावितदोषानां निरसनाय प्रथमसूत्रे एव प्रयासः कृतोस्तीति च वक्तुं शक्यते।

(ङ) "अत्र आत्पदबोध्याकारसमुदायस्य न संज्ञा, तादृशलक्ष्याभावात्संज्ञावैयर्थ्यापत्तेः । किन्तु आदैच्पदबोध्यप्रत्येकवर्णस्यैव वृद्धिसंज्ञा। **'अनाकृतिः संज्ञा, आकृतिमन्तः संज्ञिनः'** (पतञ्जलिः, ई. २०२५, पृ. १२६)इति भाष्ये अनाकृतिरित्यस्य भेदरहिता इत्यर्थः। एका इति यावत्। आकृतिमन्त इत्यस्य भेदवन्त इत्यर्थः। अनेके इत्यर्थः। तथा चैकशब्दत्वाद् वृद्धिः संज्ञा। बहुत्वादादैचः संज्ञिनः, लघ्वर्थं हि संज्ञाकरणम्, इत्यादिना वृद्धेः संज्ञात्वम्, आदैचां संज्ञित्वं च व्यवस्थाप्य पूर्वोच्चारितः संज्ञी परोच्चारिता संज्ञा। कुत एतत् सतो हि कार्यिणः

कार्येण भवितव्यम् । इतरत्रापि सतो मांसपिण्डस्य देवदत्त इति संज्ञा क्रियते । कथं 'वृद्धिरादैच्' इति । एतदेकमाचार्यस्य मङ्गलार्थं मृष्यताम् । **'मङ्गलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषकाणि च भवन्त्यायुष्मत्पुरुषाणि चाध्येतारश्च वृद्धियुक्ता यथा स्युरिति ।'** (पतञ्जलिः, ई. २०२५, पृ. १२६) )सर्वत्रैव हि व्याकरणे पूर्वोच्चारितः संज्ञी परोच्चारिता संज्ञा । 'अदेङ गुणः' इति यथा' इत्युक्तं भाष्ये । एतेन 'आदेज् वृद्धिः' इत्येव सूत्रयितुमुचितमिति शङ्का निरस्ता ।" इति व्याख्यानेन लोकव्यवहारस्य, तर्कस्य च स्थानं पाणिनीयव्याकरणे अस्ति, लोके संज्ञासंज्ञिषु जायमानस्य व्यवहारस्य इवात्र व्याकरणे पारिभाषिकसंज्ञाः कल्पिताः वर्तन्ते, लोकव्यवहारस्य विषयान्, विज्ञजनैरनुष्ठीयमानान् विषयाञ्च सम्यक्तया विचार्य प्रथमसूत्रस्यारभणकाल एवात्यन्ताश्चर्यमय्या अष्टाध्याय्या विषयाः पाणिनेर्बुद्धावासन्नित्यनुमातुं शक्यते ।

(च) "न च 'सर्वे सर्वार्थवाचकाः' इतिवचनानुसारेण वृद्धिशब्दस्यादैज्वाच्यता सिद्धैवेति नियमार्थं वृद्धिरादैजिति वाच्यम्, सर्वार्थवाचकत्वज्ञानेऽपि आदैज्वाचकत्वेन सूत्रात्प्राग् ज्ञानाभावेन नियमत्वानुपपत्तेः ।" अनेन व्याख्यानेन पाणिनेरनन्तरकाले विकसितायाः व्याकरणदर्शनपरम्परायाश्चाप्यनुकूलनत्वेन सर्वाणि पाणिनीयसूत्राण्यासन्निति वृद्धिरादैच् सूत्रस्यैव सूक्ष्मालोचनेन ज्ञातुं शक्यते ।

**निष्कर्षः**

महर्षिणा पाणिनिना स्वीयेऽष्टाध्यायीग्रन्थे आसन्ननवतिः पारिभाषिकसंज्ञाः प्रकल्पिताः सन्ति । तास्वासन्नचत्वारिंशतः पारिभाषिकसंज्ञानां कृते प्रतिसंज्ञमेकं सूत्रं प्रणीतमस्ति चेदेकस्या एव संज्ञायाः कृते नैकानि संज्ञासूत्राणि च विरचितानि वर्तन्ते । एवं शैल्यप्यपर्याप्तेत्यनुभूय संज्ञाधिकारसूत्राणि नवसंख्यायां विरचितानि वर्तन्ते । पाणिनिना संज्ञाविधायकानि कति सूत्राणि रचितानीति निश्चप्रचं वक्तुमत्यन्तं काठिन्यमस्ति । संज्ञाधिकारसूत्रस्याभ्यन्तरेऽपि बहूनां संज्ञासूत्राणां प्रणयनात् । तत्र पाणिनिः **आदिरन्त्येन सहेता** प्रभृतीनि साक्षात् संज्ञानामप्रतिपादकानि सूत्राणि च चकार । एतासु नैकविधासु संज्ञासु प्रथमासंज्ञास्ति वृद्धिः, अस्याः संज्ञायाः विधायकं सूत्रमस्ति 'वृद्धिरादैच्' इति । प्रायशः संज्ञाविधायकेषु सूत्रेषु पूर्वं संज्ञिपदानामादौ लेखनस्य पाणिनेः शैली सत्यप्यत्रादौ संज्ञापदस्य प्रणयनं मङ्गलार्थमस्ति । आदैच् पदे भत्वात् कुत्वं न भवति । अत्र तद्भावितातद्भावितानामुभयविधानाम् आ ऐ औ वर्णानामनेन सूत्रेण वृद्धिसंज्ञा । सूत्रे पदद्वयमस्ति वृद्धिः आदैच् इति । तत्र आदैच् पदेनाष्टादशानां वर्णानामुपस्थितिः तासामेव च वृद्धिसंज्ञा । तत्र 'वृद्धिरादैच्' इति सूत्रस्य अधुनावधि नैकैराचार्यैः व्याख्यानं परिष्कारश्च कृतोस्ति । तत्र समेषां व्याख्यातृणां भाष्यतात्पर्यप्रकाशनमेवान्तिमोद्देश्यं वर्तते । वृद्धिसंज्ञाया उल्लेखः साक्षात् नवसु सूत्रेषु सत्वादप्यस्याः संज्ञायाः प्रभावोऽनुवृत्तिरूपेण परम्परया च प्रसङ्गेन अष्टमाध्यायपर्यन्तं तत्र तत्र सूत्रेषु दृश्यते । तत्र उपर्युक्तव्याख्यानस्य प्रदर्शनेन, निष्कर्षस्य प्रस्तुत्या च अष्टाध्याय्यां परिकल्पिताः नियमव्यवस्था, अनुवृत्तिव्यवस्था, अपवादव्यवस्था, षड्विधसूत्राणां व्यवस्था, प्रत्याहारव्यवस्था, अन्यानि भाषावैज्ञानिकतत्त्वानि च वृद्धिरादैच् सूत्रस्यैव प्रणयनकाले पाणिनेर्बुद्धिस्थान्यासन्, एतेषां सङ्केतः सूत्रेऽस्मिन् स्पष्टं द्रष्टुं शक्यते इति विदुषां समक्षं विनिवेदयामः ।।इति।।

**सन्दर्भसूची**


अग्रवाल, वासुदेवशरणः (१९९६). *पाणिनिकालीन भारतवर्ष*. चौखम्बा सुरभारती प्रकाशन।

आचार्यः, विश्वेश्वसूरिः (ई.१९९५). *व्याकरणसिद्धान्तसुधानिधिः*. राजस्थान–पत्रिका।

कौडिन्यायनः, शिवराजः (ई.२०१२). *पाणिनीयशिक्षा*. चौखम्बासुरभारतीप्रकाशन।

दीक्षितः, भट्टोजिः (ई.२००३). *प्रौढमनोरमा*. चौखम्बा संस्कृत भवन।

दीक्षितः, भट्टोजिः (ई.२००३). *वैयाकरणसिद्धान्तकौमुदी* (बालमनोरमा–तत्त्वबोधिनीव्याख्यासहिता). चौखम्बा संस्कृत भवन।

भट्टः, नागेशः (ई.२००९). *परिभाषेन्दुशेखरः* (पुनर्मुद्रण). चौखम्बा सुरभारती प्रकाशन।

भट्टः, नागेशः (२०५८). *लघुशब्देन्दुशेखरः*. चौखम्बा संस्कृत संस्थान।

भर्तृहरिः (ई. २००६). *वाक्यपदीयम्* (ब्रह्मकाण्डम्). चौखम्बा संस्कृत संस्थान।

पतञ्जलिः (ई. २०२५). *व्याकरणमहाभाष्यम्*. मोतीलाल बनारसीदासः।

शर्मा, हरिप्रसादः (२०६०). *अष्टाध्यायी* (शारदाप्रभाव्याख्यासहिता). महेन्द्रसंस्कृतविश्वविद्यालयः।

शर्मोपाध्यायः, सभापतिः (ई. १९६६). *लक्ष्मीटीका* (वैयाकरणसिद्धान्तकौमुदी). मोतीलाल बनारसीदासः।

शास्त्री, गोपालः (ई. १९९६). *पाणिनीयप्रबोधः*. सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः।